## इदुद्भ्याम्। (११७/२९७)

[1]इकारोकाराभ्यां नदीसञ्ज्ञकाभ्याम् उत्तरस्य ङेः आम् आदेशो भवति। [2]कृत्याम्। धेन्वाम्॥

## औत्। (११८/२९६)

इदुद्भ्यामुत्तरस्य ङेः औकारादेशो भवति। यन् न नदीसञ्ज्ञं नापि घिसञ्ज्ञम् इकारान्तम्, तदिहोदाहरणम्। सख्यौ। पत्यौ॥

## अच्च घेः। (११९/२४७)

[3]औत् इति वर्तते। [4]घिसञ्ज्ञकादुत्तरस्य ङेः औकारादेशो भवति, तस्य च घेः अकारादेशो भवति। अग्नौ। वायौ कृतौ। धेनौ। पटौ। अत् इति तपरकरणं स्त्रियां टापो निवृत्त्यर्थम्। 'औदच्च घेः' इति येषामेकमेवेदं सूत्रम्, ते प्रधानशिष्टम् इदुद्भ्याम् औत्वं वर्णयन्ति, अन्वाचयशिष्टं घेः अकारम् इति॥

## आङो नाऽस्त्रियाम्। (१२०/२४४)

घेः उत्तरस्य आङः [5]नाभावो भवति [6]अस्त्रियाम्। अग्निना। वायुना। पटुना। पुंसि इति नोक्तम्, अमुना ब्राह्मणकुलेन। अस्त्रियाम् इति किम्? कृत्या। धेन्वा॥

इति काशिकायां वृत्तौ
सप्तमाध्यायस्य तृतीयः पादः॥

----(०)----

1. नदीग्रहणमतुवर्तते इत्यधिकम् ब. ई. 2. गत्याम् ई. 3. वाक्यमिदं नास्ति इ. ह. 4. घेरुत्तरस्य ब. 5. ना ईत्ययमादेशः इ. ह. 6. अस्त्रियाम् नास्ति ह.